णिप्रतिपद्यते।उत्तरेणशालामुखीयंदर्भान्संस्तीर्यसंस्पृश्यधानालाजभर्ज
नार्थंह्येकपालेष्टौपुरोडाशाथोन्निसरूपमुसुनक्ति।अग्निहोत्रहवणीशूर्पंक १०५
ष्णाजिनेशम्यामुलूखलंमुसलंदृषदमुपलांवाजिनपात्रंकुटरुंआज्यपा
त्रंपात्रीमेक्षणंप्रणीताप्रणयनं[illegible]घर

णार्थंस्थाल्यो मार्जनार्थं चमेक्षणे दारुपात्राणि च यथार्थं प्रयुनक्ति। पवित्रेकृ
ताप्रणीताः प्रणयति। ब्रह्मयजमानयोर्यथास्थानस्थितयोः अपरेणाग्निं पा
त्रीं निधाय तस्यै कदद्या यवान्निधायोत्तरतो व्रीहीन्दक्षिणतः स्फ्यमुपकृष्य
दक्षायवानस्पत्यासीत्यादिरुर्जेधस्वेत्यावर्त्तते अपहतमितिस्लकृत शूर्पं पादि
त्रे निधाय। यच्छंतां देवस्यत्वा इंद्राय हरिवते जुष्टं नि॰ इति यवान्। यच्छंतां देव
स्यत्वा इंद्राय पूषण्वते जुष्टं नि इति यवान्। यच्छंतां देवस्यत्वा सरस्वत्यै भार
त्यै जुष्टं नि इति व्रीहीन् यच्छंतां देवस्यत्वा इंद्राय जुष्टं नि इति व्रीहीन्। इदं देवा
नां इदमनुः सह स्फात्यैत्वेति प्रतिबीजमावर्त्तते। उर्वंतरिक्षमन्वितं अदित्या
वामुप इंद्र हरिवन्हव्यं रक्षस्व इंद्र पूषण्वन्ह स्व। सरस्वति भारति ह स्व।

१०६ इंद्रस्य॰ स्वादेवस्यत्वा॰ इंद्रायहरिवंतेवा जुष्टं प्रोक्षामि इंद्रायपूषण्वते जुष्टं प्रोक्षा
मीन्द्रस्यपूषण्वते जुष्टं प्रोक्षामि सरस्वत्यै भारत्यै॰ इंद्रायजु॰ इति हविः प्रोक्ष्य पात्रे
षु प्रोक्षितेषु। यथाभागंव्यावर्तेथा मितिव्रीहीन्विभज्य इदं सरस्वत्यै भारत्यै॰ इ
दमिंद्राय अर्धान्पुरोडाशधानवर्हति अर्धान्निदधाति। कृष्णाजिनादाना दि
उलूखलाधिवर्तनांतंतत्र। रक्षसां भागोसि इत्यवबाउ दजं निष्फलीकरणांतं य
वानांकृत्वा। ततो व्रीहीणामग्नेस्तनूरसीत्यादि हविष्कृद्धजं फलीकरणांतं कर्म
ण पृथक्पृथक्करोति। प्रक्षालननिनयनं तत्र पुरोडाशीयानेव पिनष्टि। तत्रश्लो
काः। निर्वापे [illegible] सर्वे [illegible] साने तु तत्र प्रत्यभिमर्श
नं। सर्वेभ्यो लोष्टमादाय तंत्रं निरसनं भवेत्। निरुप्तं प्रथमं वीजं पात्रेन्यस्मिन्न्
१०६

पेश्यतत् पवित्रे थो निधाना दिद्धतीयप्रक्रमो भवेत्। अभिमर्शास्त्रेयोनानासरु
स्यादुपसादनं। यथा यमूहागमन एव भेवोपसादने अजिनो लूखलं तत्र मादि
तःस्थापितं भवेत् आ हृतः प्रथमे बीजहविष्कृदवति स्वते। तत्रैव न वक्तव्यः समा
घातो श्मनो भवेत् तुषोपवपनं काय बीजेत्यस्ततरेखुन। फलीकरणपर्यंतमन्य
त्सर्वेषु वर्त्तते। संसेव प्रथमे मंत्राः सप्तत्रिंश त्ततः परं। अष्टा दशावघातांत
राक्षसावधिको। ततः। प्रक्षालनं पृथक्पात्रे तत्रानिनयनं भवेत्। पोषणेचाश
वस्थात तत्रमादौ कृतं भवेत् इति। धृष्ट्यादानादि आदेवयजनं वह। ध्रुवमसी
त्यनेन धानार्थं कपालमुपधाय पुनरपाग्न इत्यादिना ध्रुवमसीति लाजार्थ
मुपदधाति। निर्दग्धमित्युभयत्र लुप्यते। ततोपाग्न आ देवयजमित्यादिना

१०७ एकादशकपालवदष्टौ कपालानि पुरोडाशस्योपदधाति। सितस्येति कुप्यते। भृगूणा
मिति पुरोडाशार्थेष्वेवमेव भर्जनयोः। आमिक्षायाः कल्पने मैत्रावरुणीमामिक्षां
करोति। निरूढमित्यादि संपृच्यध्वमित्यंतं प्रातर्दोहं कृत्वा। मित्रावरुणाभ्यां
हविरिंद्रियं बृहद्दुग्धि मित्रावरुणाभ्यामिति विकारः। देवस्यत्वेति पिष्टानि संव
पति संवपनं कृत्वा हयो स्वेति तंडुलानां ततो व्रीहीणां ततः पिष्टानां उत्सवनं कृ
त्वा ततः समाप इत्यादि अंगारापोहनांतं पुरोडाशस्य करोति घर्मोस्य विश्वा
युषः इति धानार्थास्तंडुलान्स्वे कपाले ओप्य घर्मोस्य विश्वायुष इति व्रीहींश्च १०७
स्वे कपाल ओप्य धाना लाजांश्च करोति। अनुपदह्यमानाः परिशेरते। ततो
मुखस्येत्यादि त्वचं गृह्णीष्वेत्येतदंतं पुरोडाशस्य कृत्वा तप्ते प्रातर्दोहे सायं

दोहमानयत्साभिक्षांवाजिनंचपृथक्पात्रयोःकलात्रघातमुभयंनिदधाति।सेहे
वसर्वेषांपर्यग्निकरणमभिज्वलनंचपुरोडाशस्यैव।परितपनंत्रयाणां।संब्रे
ह्मणेतिपुरोडाशस्य।अविदहंतश्रपयतेतिसर्वेषांकरोति।ततआप्येभ्योनि
नायस्त्रुचंसंमृढीतिसंप्रेष्यति।ततोनीत्वाजिनपात्रंसंमार्ष्टि।अनिशितासि
सपत्नक्षयणी॰घृताच्यसिजुह्वित्वाह्वयति॰याइत्यादिप्रजुष्टंरक्षः॰तयो
मेत्रस्यातेजिष्टेनते॰पामीतिविकारःवाचंप्राणमितिसंमार्गमंत्रः।चमसपक्षे
मेत्रस्यातेजिष्टेनते॰पामीतिविकारःवाचंप्राणमितिसंमार्गमंत्रः।चमसपक्षे
अनिशितोसिसपत्नक्षयणःघृताच्यसि॰शेषंपूर्ववत्।वाचंप्रा॰वाजिनंसा
सपत्नसाहंइतिविकारः।ततःप्रतिप्रस्थाता।सूर्यज्योतिषोविभातं
महतइंद्रियायेतिधानाअभिमंत्र्य।विभाहीतिलाजान्पुरोडाशंचाभिमंत्र्य

१०८ ने।स्योनं तदृति पुरोडाशस्य। नाभिघारयति धानाः मंत्रेण लाजानभिघारयति
आप्यायतां घृ० सरस्वत्यै भारत्यै जुष्टम० तूष्णीं पुरोडाशमभिघार्य यस्त आत्म
त्यामिक्षामभिघारयति। न वाजिनमभिघारयति। महापितृयज्ञवत् कपालै
नस्सह धाना उद्वासयेत् आर्द्रो भुवनस्य गोप्ताः श्रृता उत्स्नातिजनि त्र्यामती
नामिति विकारेण लाजानुद्वास्य आर्द्रः प्रथस्नुरिति पुरोडाशमुद्वासय
ति। ततो दृंहे त्यामिक्षामुद्वास्य तूष्णीं वाजिनमुद्वास्य राभूतिरिति पुरोडा १०८
शकपालानि चोद्वासयति यथाभागं व्यावर्तेथामिति धाना विभज्य दर्भि
द्वाय हरिवते इदमिंद्राय पूषण्वते इति कृत्वा हरिवद्ध्यो धानास्तूष्णीमभि
घार्य निधाय तरासामधानीकरं भकरोति तस्य अयोगः कृत्वा जिना

दानादिप्रैषवर्जंमावृतासक्तून्करोतिजनयत्यैत्वासंयौमीत्यपूर्वोन्येनसं
थ्येतिसकरंभोभवतिकरंभंतूलीमभिघार्यनिदधाति एतदंतंप्रातिप्रस्था
तुःकर्मसमाप्तः सवनीयनिर्वापः अनलंकृतपुरुविष्णु अथाध्वर्युः पशु
रग्निरधाय्यविययत्ये तस्यांशस्यमानायांश्रणत्वग्निः समिधाहवंमेऽ
हवंमेस्वाहेति प्रचरण्यांपूर्वंगृहीतंचतुर्गृहीतंचतुर्गृहीतंजुहोति। अम्यवु
ग्रावदेवसवितरभ्यद्द्द. अपरंचतुर्गृहीतंगृहीलादर्भमुष्टिंधारयमाणः
अपइव्यहोतर्मैत्रावरुणस्यचमसाध्वर्यवाद्रवेकधानिनूआद्रवतनेष्टः
पत्नीमुदानयोनेतर्होतचमसेनवसतीवरीभिश्चचात्वालेञ्जत्युपास्वेति
संप्रेष्यतिमैत्रावरुणस्यचमसाध्वर्युश्चमससमादायाद्रवेतिच्यवराअ

श्रीः

१०९ युजपरिक्रममाणान्‌ कधारयमाणां स्थालीरादायाद्रवंति। प्रत्युदेत्य तस्य वामीरन्वं
मामाहिंसीः इति नेष्टा पत्नीमुत्थाप्य पत्नीजनी स्थाली धारयमाणमानयति।
वसर्जनमाणीगों। मैत्रावरुण चमसाध्वर्यु प्रभृत सोत्रं ला ध्वर्यु यजमाना श्वस
रु पत्नीकारस्ते। थैन निष्क्रम्य यत्रा पद्‌छंति। उन्नेता होता तच्चमसं वसती वरी
श्चादाय चात्वालदेशे एषा मागमनं प्रतीक्षमाण तिष्ठति। यत्र होतुः प्रातरनु
वाकमनुब्रुवतेउपश्टणुयात्तदध्वर्यु गृह्णीयात्। अम्भूतणं प्रास्य। दीवीरा १०९
पा अपांनद्यं पो उर्मिर्हविः येषां भागस्य स्वाहा। इति प्रचरण्यां स्थितं चतु
गृहीतं जुहोति। अद्भ्य इदं आज्य शेषं करोति। कोर्षि रस्य पापां मधुं। इति
दैभैराहुतिमपप्लावयति। समुद्रस्य वा क्षित्या उन्नये। इत्स घृत लिप्त चमसा

नोमैत्रावरुणचमसेनोन्नयति॥ हीत्वा चमसाध्वर्यवे प्रयच्छति एतेनैव मंत्रेण
कथानाःसुस्थाली॥ पुनरेकैकां हूत्वा गृह्णाति॥ ताश्चैकधनिभ्यः प्रयच्छति अथप
त्नी। वसुभ्यो रुद्रेभ्य आदित्येभ्यो वि॰ यतः पत्नेजनी गृह्णामि इति पत्नेजनी
गृह्णाति ये स्थालीरा हरंति तत आनयंति। नेष्टा। प्रत्युदेत्य तस्य वामी रत्नं॰ माहि
॰सीः इति पत्नीमुदानयति सर्वे यथेतं प्रत्येत्य तीर्थेन विहारं प्रविशंति। ततः
पत्न्युत्तरेण हविर्धानं दक्षिणेनाग्नीध्रं च गत्वा पूर्वेण द्वारेण सदः प्रविश्याग्रेण
प्रशास्त्रीयं धिष्ण्यं परीत्य दक्षिणेन गत्वा परेण सर्वान् धिष्ण्यान् गत्वा परेण
नेष्टधिष्ण्यं गत्वा। वसुभ्यो रुद्रेभ्य आदित्ये॰भ्यः पत्नेजनीः सादयामि। इति
पत्नेजनीः सादयति। चात्वालमित्कुंभ्यादीनामादातारः सहाध्वर्यवो दिभि

११० यंति। पत्नीयथेतंप्रत्सेत्यैवेसजेनहोमीयमार्गेणप्राग्वंशमेव प्रविशति अध्वर्युः
संवोदधातुवरुणःसमिंद्रस धाता संवृहस्पतिःत्वष्टाविष्णुःप्रजायासंररा
णोयजमानायद्रविणंदधातुयथाधुरंधुरो धूर्भिःकल्पता।इत्युपरि चात्वाल
होतृचमसंमैत्रावरुण चमसं [illegible] सं च संस्पर्शयन्होतृचमसेव स
तीवरीणामेकदेशंनिषिच्यतासां होतृचमसीयानामेकदेशंमैत्रावरुण
चमसआनयति।ततो मैत्रावरुण चमसादेकदेशंहोतृचमसआनयति।
संवोनक्तुवरुणःसमिंद्रःसंधाता संबृहस्पतिःत्वष्टाविष्णुःप्रजयासंररा
णोयजमानायद्रविणदधातुयथा धुरंधुरोधूर्भिःकल्पताइति होतृचमसी ११०
याअपःमैत्रावरुण चमसीयाश्चद्विरावर्त्यातास्मिन्नेव देशे प्रचरणीस्थना

ज्येनसमनक्ति। सर्वहोतृचमसस्याभिरद्भिः सह होतुरंतिकमायंति तेषामध्वर्युः पूर्वो गच्छ
ति तं गच्छंतं होता। अध्वर्यो वेरपाः३ इति त्रिः पृच्छति। होतृप्रश्नानंतरं अध्वर्युः उतेम
नन्नमुरुतमाः३ पश्येयति त्रिः प्रत्याह प्रचरणी गते नशेषे धातरि मन्न विद्यमाने न्यंज्ञतुग्द
होतं गृहीत्वायमग्ने पृक्षु मर्त्यं॰ शम्भूतारिषः स्वाहा। अग्नय इदं। क्रतुकरणसंज्ञकं सर्वहु
तं जुहोति। पूर्वोध्वर्युर्हविर्धानं प्रविश्य दक्षिणस्य हविर्धानस्य प्रथुरत्तु बुकदेशे प्र
चरणीं सादयति अथ होतृचमसं वसतीवरीकुंभं मैत्रावरुण चमसौ याः सवनी
याश्च उन्नेता मैत्रावरुणचमसाध्वर्युः एकधाननश्चकुम्भ्यादीना माहृत्यारो पूरेण
द्वारेण हविर्धानं प्रपादयंति अत्रैव यजमानाग्रे वक्ष्यमाणेन मार्गेण प्रविशति।
ततो ब्रह्मोल्कधनासु वसतीवरीभिः प्रपाद्यमानासु वै पूर्णद्वारेण हविर्धाने प्रवि
श्याग्रेण खरं परीत्य दक्षिणत उपविश्या ग्रहकालादास्ते ग्रहेषु गृह्यमाणेषु

११ नाचंयछ्यात्याग्रयणस्यग्रहणात् अध्वर्युः तान् चमसमपरेण छंदोगान्दक्षिणेन
नीत्वा दक्षिणस्य हविर्धानस्योत्तरस्यावर्तन्यामक्षस्य पुरस्तादीषस्पृष्टं चक्रेण सा
दयति ततो वसतीवरीं मैत्रावरुण चमसीयाः अपरेण छंदोगानुत्तरेण नीतोत्तर
स्य हविर्धानस्य समीपे यथावकाशं सादयति एकधानानां तु पश्चादक्षमेवासा
दनं। ततो यजमानः यस्मिन्नेव काले सवनीयाः अपो हविर्धानम ध्वर्युः प्रपा
दयति तस्मिन्नेव काले ता अनुप्रविश्य अपरेण छंदोगान् दक्षिणेन दक्षिणं शं
कटं गत्वा दक्षिणतो निषवदेत् यास्ते अत्र तु ये नैव द्वारेण राज्ञः प्रतिपा
दनं तेनैव द्वारेणापामपि प्रतिपादनमित्यादि भाष्यकारोक्तं द्रष्टव्यं ततो ११
ध्वर्युः निग्राभ्याः स्थ देवश्रुतः शुक्राः शुक्रभृतः पृताः पृतभृत आयुर्मे तर्पयत प्रा०

मोमेणोमेमा। वित्व बन्दा इति होतृचमसः सर्वयजमानं वाचयति तानि ग्राभ्या भवंति

अथाध्वर्युः ग्रहप्रचारः। आग्रयण ग्रहग्रहणपर्यंतं येग्रहाः ते तेचोपांशुग्राह्याः

आग्रयणादूर्ध्वमुपह्विमता मन्द्रादीषन्न्यूनेन स्वरेण ग्राह्याः तत्र दधिग्रहेण

प्रचरति उपयामगृहीतोसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे ...

... भ्यो दिवे त्वांतरिक्षाय त्वा

पृथिव्यै त्वा। इति दधिग्रहपात्रे पूर्वकृतस्य दध्नो दधिग्रहं गृह्णाति। अपेंद्र द्विष

तो मनो प्रजिज्या ... तीयाति तं जहि। इति देवं दधिग्रहं अग्रेण स्वरं दक्षिणेन ब्र

ह्म यजमानौ नीत्वाहवनीयं हरति। प्राणाय त्वापानाय त्वा व्यानाय त्वा सते

त्वा ज्योतिष्मते ज्योतिष्मन्तं जुहोमि स्वाहा। प्रजापतय इदं। इति जुहोति।

सामग्रहीष्यन्त्राजानमा ... दत्त या ... वंतमे कग्रहाया त्वं मन्यते प्रस्तुपनेष्येतरंति

॥११२ दधाति। ग्रहार्थं गृहीतमुपरेष्वुप्य वसतीवरीभ्यो न्यस्मिन्पात्रेभिषिच्यापरेण
छदो गान्नीत्वा अंतरेण सुमुविश्य न्न राजानं वसतीवरीभिरुपसृज्य। अधीवधं
अवीवृधंवो मनसा सुजा० स च नायसोमं। इत्यभिमंत्र्य सकृदभिषुत्य तिस्रो
त्यन्तस्य समिधः परिगृह्णन्देवा अकण्व लुशिजो अमर्त्यवे। तास्वामेका मदधु
र्मर्त्ये भुजं लोकमिद्धु उप जामीनर्ईयतुः इति येन केन चित्पात्रेण ग्रावा यथार्थ
मभिषुणोति यो भिषूयमाणस्य राजन्तश्चुम्भणो बहिः प्रथमोंऽशुर्निष्क्रामति
तं मा स्कान्स रुप्रजया सहरायस्पोषेण। द्रव्यं मे वीर्ये मा निर्वधीः इत्यभि
मंत्रयते प्रस्ताद्दरतिवा। ततउद्धृत्वा दक्षिणस्कंधे पृथिवीमनुद्या० सप्तहो
त्राः इति बहिःस्कंदिता विप्रुषानुमंत्रयते। यदि स्कन्नाः स्युः सर्वेषामभि[illegible] ॥११२

मभिषवर्णांविप्रुडनुमंत्रणांतः कल्पो भवति अभिषवमंत्रवर्जंयेनैवमार्गेणोपाहृ
तः सोमः तेनैव पात्रं प्रवेश्य प्रत्यारत्निस हिरण्येन पाणिना उपयामगृ० पृथिव्यै
त्वा इति गृहीत्वा अपेंद्रद्धि० तंजु॥ इति हरति पूर्ववत् प्राणायत्वापा० जुहोमि
स्वाहेति जुहोति। प्रजापतयइदं० पूर्ववद्दक्षिणार्धपूर्वार्द्धे उत्तरार्धपूर्वार्धे वा
हवनीये पूर्वे जुहोति। सर्वत्र वसतीवरीयामुपरि राजन्यश्च प्रपादने धाराग्रह
णे सर्वत्रवाहवनीयं प्रति नयन्ते अयमेव मार्गः यत्रैकमेव जुहोति दक्षिणार्धे
पूर्वार्धे वा तत्रैव सर्वत्र सोमाहुती जुहोति आज्यदधिग्रहयोः नास्ति देशनियमः
हुत्वात्र शेषं भक्षाय करोति इति सर्व सोमाभिषवाणां कल्पः अन्येनाहृत सो
मे भक्षविधिरग्रे यथायोगं व्याख्यास्यते। सोमग्रहभक्षः अग्रेण होतारम्

स्यङ्का सीनः न्न चक्षसं ला० रव्य प्रमित्सेवेस्य। मंद्राभिभूतिरिति भक्षयति हिन्वंॅऽत्या म
॥११२ त्मानमभिमर्शति यस्त पुरोल्पं सादयति। अंशुना प्रस्तरति राजानमपादायेस्मा
दिविभुड नुमंत्रणं। तमु क्रेमव उप रेन्यु च्य यसंतीवरा मिरुपस्त ज्य अवीवृधंव
इत्यादिना सोममभिमंत्र्य सकृदभिषुत्य आमा स्कानिति प्रथमं स्वन्नमंशुम
भिमंत्र्यादायवा द्र प्सश्चस्कंदेति विप्रुषो नुमंत्र्य प्रा०ण्यापान्य प्राणानूक
यानच्छ्वित्र आभुवद्दू० ष्टसावृता। इतिवामदेव्यं साममनसा गायमानो वा
उपयामगृहीतोसीति गृह्णाति यद्यन वानं ग्रहीतुं न शक्नोति आनः प्रा
णएतु परावत आ० सि प्राणाय त्वा। इति हिरण्य शतमानं गृह्णाति। तंश
तमानेन हिरण्येन संस्पृश्य हिरण्येनापि दधाति। इंद्राग्नी मेवर्चः कृणुतां ॥११२

व॰ धत्तमश्विना। इतियथोक्तं हरति। ततान वानं। दधन्वेवायदीमनु वाऽक्र
मिवाप्यवत्साह। प्रजापतयइदं। अद्भिः प्रतिप्रस्थाताध्वर्युं प्रत्युक्षाति। द्वाद
शधेनूः पष्ठौही वागर्भिणीः कृत्याधिवासंवांशौ। अध्वर्यो नैददामीम ध्वर्यवे
यजमानोवरंददाति। अध्वर्युः पूर्वेणद्वारेण सादिसर्वं ग्रहाणां समानं। पूर्वेण
द्वारेण सदः प्रविश्याग्रणोहोतार पुरस्तात्प्रत्यङ्मुखासीनः नेत्रक्षस्संवादेवसो
मसुचक्षा अवख्येषमित्येवक्षपवाग्देवी सोमस्यतृप्यत्विति भक्षयति हिन्व
मगात्राहरिवो॰ मिसृत्निगाः इत्यालानं प्रत्यभिमृशति। मार्जालीयपात्रं प्रक्षा
ल्यायक्षेत्रेसादयति। अदाभ्येन प्रचरति वसवस्त्वा प्रवृहन्तु गा॰ उपहि। रु
द्रा स्त्वा प्रवृहन्तु त्रै॰ उपहि। आदित्यास्त्वा प्रवृहन्तु जा॰ उपहि। इत्युपनह्य

स्वराज्ञस्त्रीनं भूनसंस्पष्टान्ध रा।तान्अ रह्या न्यस्मिन्निषिच्य लौकिकस्य
।।११४ दध्नोऽभिग्राह्याणां वा एकदेशं दधिग्रह पात्रादन्यस्मिन्पात्रे निषिच्य मांदा
सुते शुक्र शुक्रमा धूनोमि भंदना सुते शु० नो मिको तना सुते शुक्र० मितत
स्मिन्न तैरेतान शु न्क्षिः अ दक्षिणमनुपरिप्लावयति। शुक्रं ते शुक्रेण गृह्णा
म्यह्नो रूपे० रश्मिभिः। उपयामगृहीतासि। अग्निः प्रातः सवने पात्वस्मा
न्वै० भक्षाः स्याम। उपयामगृ० सि। विश्वे देवा मरुत इन्द्रो अस्मा० सुमतौ स्या
म। उपयामगृ० सि। इदं तृतीयं सवनं कवी० स्त्रीयो नयं तु। उपयामगृ० सि।
दधिग्रहपात्रे तैस्त्रिर्ग्रहं गृह्णामि। आस्मिन्नुग्रा अचु स्युवु० असश्च
तो इति हरति ककुहं रूपं वृषभस्य रोचते। बृहत इत्यभिमंत्रयते सोमः सो ।।११४

मस्थपरोगाः शु॰ यत्ते॰ सोमायस्वाहा। इतिजुहोति। सोमायेदं। द्वादशधेनूः प
ष्ठौहीर्वाग भिणीः कस्य धिवासंवाध्वर्यो नेदक्षामि अभिषवाभावाद्दक्षिणाभावः
प्र अध्वर्युः येनक्रमेणोवद्धास्तेनैवक्रमेण प्रशातानिशृन्नुसवनमभिषवार्थेनि
दधाति। द्वितीयः पटलः देवस्यत्वा स॰ भादमादे। इत्युपांशुसवनं ग्रावाणमा
दायवाचं यच्छत्याग्रयणस्य ग्रहणात्। उपांशुसवनाभावेपि वाग्यमनं स्यात्
ग्रावास्यध्वरकृद्देवेभ्यो गंभीर॰ स्वंतंवच्छिवनो इत्यभिमंत्र्यते। तस्यधिषवण
उर्ध्वसानुं निधाय। इंद्रायत्वा वृत्रघ्ने इंद्रायत्वा वृत्रतुरे इंद्रायत्वाभिमातिघ्ने
इंद्रायत्वादित्यवते इंद्रायत्वा विश्वदेव्यावते इति पंचभिर्मंत्रैरुपांशुसवनं ग्रा
वाणमभितस्योपरीतियावत् राजानमभिमिमीते। उपसमूहनं वर्जते नै

वक्रेमेण तद्यथासहिरण्येन पाणिना लौकिकयां गुल्यलसेननुक्रमेणैतैर्मंत्रैःपंच
मिःपंचकृत्वो मिमीते तूष्णीं पंच कृत्वः अधिषवणस्यैकदेशे राजानं न्युप्य याव
॥११९॥ दकग्रहार्थं पर्याप्तं मन्यते तावंतमादाय प्रत्युपनह्येतरान्निदधाति ग्रहाया
प्तमुपरेन्युप्यवसतीवरीभिरुपसृज्य श्चात्रास्थ वृत्रतुरोराधोगूः कं सो
मः पिबतु। इति होतृचमसस्थाभिर्निग्राह्याभिरद्भिरंतरेषमुपसृजति। य
त्तसोम दिवि ज्योतिर्य॰ धिदा[illegible] त्रवोचः। इत्युपसृष्टं राजानमभिमंत्र
यते। उपसृष्टस्य राज्ञः षडंशून् संसृष्टानकं काडीन्नूता प्रवृह्य प्रवर्हण
क्रमेणाप्त्वा तान्निधाय तरानादाय उपरिष्टात्पाणिस्तंगावाणं धारयन् ॥११९॥
न धस्यां दंशून्। आगपा गुहाधरा को॰ बनिभर। होतृचमसे त्रिः प्रद

क्षिणमनुपरिप्लावयति। स निग्राभो भवति तानुपरेन्नुपस्कसतीवरीभिरुप
सृज्य अवींद्धवो मनसा० नायसोमं। इत्यभिमंत्र्य माभेर्मा संविक्था इति
ग्रावाणमुद्यम्य धिषणेवीडू सतीवी० ध्रुमामाहिंसिष्ट। इत्यधिषवण
फलकेऽभिमंत्र्य। अनागसस्त्वा वयं मिंद्रेण० स्तेऽस्त्वंशो भूरहतः सो
मोजोरोइति यत्र मूलं लोष्टतृणं वाप इयात्तितास्मिन्देशे सभे प्रहरति यदि
तानिनस्युरं तर्हि तृणमंतर्धाय प्रहरति सकृन्मंत्रमुक्त्वा प्रथमाभिषवो
द्वाभ्यां हस्ताभ्यामष्टौ कृत्वोऽभिषुत्य सति निमित्ते आमास्कां० द्रप्सश्चस्कं
द: इत्येतयोः कृतयोः प्रागपागुदगिति निग्राभमुपैति अपात्तानामंशूनांद्वा
भ्यां प्रथमद्वितीयाभ्यां उपांशुपात्रमपिधायोत्तरतः अति म स्थातापयद्ध

ति। वाचस्पतये पवस्व वाजिनं गभस्तिपूतः इति तस्मिन्नंजलिनाध्वर्युः सोममासिं
चति। एवं द्वितीयेन पर्यायेणाभिषुणोति। तं ग्राभ्या त्रास्थ नृत्वंतु रइति निग्रा
।११६ भ्याभिरुपसृज्य यत्ते सोम दिवि ज्योतिरित्यभिमंत्र्य उपरिष्टाद् ग्रावाणं धार
यित्वा प्रागपागुदगिति होतृचमसे त्रिः प्रदक्षिणमनुपरिप्लाव्यतानुपर
न्युप्य वसतीवरीभिरुपसृज्य अवीवृधाम इत्यभिमंत्र्य माभेर्मा संविक्त्था
इति ग्रावाणमुद्यम्याधिषवणे वीडुसती इत्यधिषवणफलके अभिमंत्र्य अना
गसस्त्वा वयमिति तस्मिन्सोमे पूर्ववत्सहृत्स एकादशकृत्वो द्वितीयमभि
षुणोति आमास्कान्द्रप्सश्चस्कंदेति कर्तव्यः प्रागपागुदगिति निग्राभ
मुपेत्य पूर्वावंशा अपो ध्वस्य प्रस्तोता निधायतृतीयचतुर्थाभ्यामुपांशुपा ।।११६

त्रमपिधायोत्तरतः प्रतिप्रस्थाताप्रयच्छति देवो देवानां पवित्रमसि येषां भा
गोऽसि तेभ्य स्त्वेति तस्मिन्नंजलिनाध्वर्युः सोममासिंचति। एवं तती यपर्या
येणाभिषुणोति। तद्यथाश्वात्रास्थ वत्र दे रइति मिग्राभ्यामिरुपसृज्ययत्ते सा
मदिवि ज्योतिरित्यभिमंत्र्य प्रागपागि। तं होतृचमसे त्रिः प्रदक्षिणमनुपरि
प्लाव्यतानु परेन्युप्य वसतीवरीभिरुपसृज्यो वीव धामित्यभिमंत्र्य माभेर्मासं
विक्था इति ग्रावाणमुद्यम्य धिषणे वीड्‌वीसती इत्यधिषवणफलके अभिमं
त्र्यानागसस्त्वा वयमिति तस्मिन्सोमपूर्वेवद्ग्रहत्यद्वादशकृत्वस्तृतीयमभि
षुणोति। आमास्का ऽऽ स्मश्वस्कंदे ति ऽ तयोः प्रागपागाति निग्राभमुपेति
द्विती यपर्यायपिधानो च्य अपोद्धत्यभरो तो निधायान्याभ्यांपं चमयच्छा

म्यामुपांशुपात्रमपिधायोत्तरतः प्रतिप्रस्थातोपयच्छति। मधुमतीर्न इषु
॥११९) स्कृधिविं॰भ्यः पार्थिवेभ्यः इतितास्मिन्नुपांशुपात्रे ध्वर्युः सोमभासिंचति।
पंचमषष्ठौ प्रज्ञातौ निदधाति। स्वाकृतासीत्युत्तिष्ठति। उर्वंतरिक्षमन्वि
हीतिगच्छति। उत्तरेण होतारमतिक्रम्य दक्षिणेन पात्रं हुत्वा मनस्त्वाष्टु।
इत्युत्तरं परिधिसंधिमन्ववहृत्य स्वाहा। त्वा सुभवः सूर्याय स्वाहा। ऊर्ध्वं
स्तिष्ठन्दक्षिणाप्राचमृजुं दीर्घं संततं जुहोति। प्राणाय त्वा देवेभ्यस्त्वा
मरीचिपेभ्यः इति मध्यमे परिधावभ्यंतरं लेपं निमार्ष्टि। देवेभ्यो मरीचि
पेभ्य इदं। यथेतं प्रत्येत्याग्रयणस्थाल्यां सतं शेषधारां संपातमवनय
ति। एष ते योनिः प्राणाय त्वेति पात्रं सादयति। तस्मिन्नंशुमवदधाति सप ॥११९)

रिशेरत।आतृतीयसवनात्।अंशुरितिरेकस्थानेनानाकांडः परियोप्तस्तृ
तीयसवनपर्याप्तः विनाशे प्रायश्चित्तं। कल्पान्यो ग्राह्यः॥ ॥महाभिषवाय
पर्युपविशंति पुरस्ताद्ध्वर्युः दक्षिणतः प्रतिप्रस्थाता पश्चान्नेष्टा उत्तरत उ
न्नेता अध्वर्युः [illegible]ज्ञानमादत्ते यावत्ते प्रातःसवनायाप्तमन्यते प्र
त्युपनह्येतरं निदधाति तमुपरेन्यूप्य वसतीवरीभिरुपसृज्य। उशिकु
तं देव सोम गायत्रेण। यो अपीहि। येदाभ्या अंशवस्तेषामेकं प्रथममपि
सृजति। यत्ते सोमादाभ्यं नाम० मसोमाय स्वाहेति द्विः उपांशुपावनानां
द्वौद्वावनुसवनं निदधाति। वसतीवरीभिरुपसृज्य अवीरध्वं वा० सो
ममित्यभिमंत्र्य सर्वैर्दक्षिणैः पाणिभिर्ग्रावभिर्यथार्थमभिषुत्यामा

श्रीः

स्कान्दस्यपश्च स्कंदेत्येतयोः कृतयोः प्रागप्यागुदग० घरअध्वर्यु र्निग्राभसुपेति
एवं विहितो द्वितीयस्तृतीयश्चाभिषवः तद्यथावसतीवर्युपसर्जनादीवृधा
।११८ भिमंत्रणाधिषवणामास्कान्दक्षानुमंत्र्य प्रागपागिति निग्राभमापयम
नातानभिषवान्कृत्वा तृतीयायमेवेव सतीवर्युपसर्जनादि निग्राभांतश्चा
भिषवः त्रिरभिषुतं राजानं आधवनीसु समिंचति एवं विहितो द्वितीय
स्तृतीयश्च पर्यायः तद्यथावसतीवर्युपसर्जनादि निग्राभमापय्य मनो
तानभिषवांतेषु राजानमाधवनीयो नषिंचतीति द्वितीयः पर्यायएवमे
वतृतीयः उत्तमेभिषवेसु संभृतं राजानं कृत्वा पवित्रेणश्रपीडय उपरंग्रा
व्णः स सुराकृत्वा ते यजमानी ग्रहणातइति सर्जापमुखान्करोति प्रा ॥११८

चमुन्नेतारो द्रोणकलशं ग्रावस्तुध्यूहंतिअधो धोक्षमुपकर्षंति। पवित्रंतेविततं
ब्रह्मणस्पतेप्रभु॰स्समाश्नुत। इतितस्मिन्नदीर्घीनदशं पवित्रमुन्नेतारो धारयं
ति अध्वर्युः पवित्रंट इत्यनयैवचोपवित्रमभिम्नयते। तस्ययजमानोऽभिक
रोति। मध्यमेदेशे धारास्रवणमार्गेवत्सस्या दरलं विमूत्रमार्गे भिवकरोति। सो
तचमसेनन्नास्मिन्संततांधारांस्त्रावयति यजमानएव आधवनीयादुन्नेतो
दचनेनविनिच्यअपरेणोन्नेतारंनीत्वाहोतृचमसेआनयति स्रुवंत्या
धारायायुहान्गृह्णाति। उपयामगृहीतोसि तयेध्मघृवन्या॰मेमघवन्मा
दयस्व। इत्यंतरोमंगृह्णाति। स्वांकृतासीत्यस्तिष्ठतिउर्वंतरिक्षमन्विहीति
गच्छति। दक्षिणेनहोतारमतिक्रम्यवालो इति दक्षिणपरिधिसंधिमन

सूर्याय
वहत्यस्वाहा।ला सुभवः स्वाहा।इतिप्रांचमुदंस्त नजुंची घि संततं जुहोति।अपानोस
दं।नेपरिधौलेपं निमोर्ष्टि नाग्रयणस्थाल्यांसपातमवनीय ति एषतेयोनिर ते
पानायत्वेत्यायतने पात्रंसादयति नांशुमवदधाति उपांश्वंतर्यामपात्रमं
।।११९ तरेण व्यानायत्वेत्युपांशुसवनं ग्रावाणं संस्पृष्टमुपांशुपात्रेण सादयति
तृतीयः पटलः रथंतरसाम्न्यैंद्रवायवाग्रान्गृह्णीयात् आवाया भूपशुचिपाउप
नःसु॰ पूर्वपेयं इतिपुरोरुचमनुद्रुत्य ऐंद्रवायवपात्रमुपयच्छति धारासमी
पे।उपयामगृहीतोसिवायवेत्वा।इतितस्मिन्गृह्णाति पात्रमपयस्यापधि
घ इंद्रवायूइमेसुताः उपप्र॰ सुशं...तिहि।इतिपुरोरुचं पुनरेवोपयच्छति
धारासमीपेधारयति।उपयामगृहीतोसीन्द्रवायुभ्यांत्वेतितस्मिन्पुनर्गृ ।।११९

हीत्वा अव्यावृत्तपवित्रं अव्याप्तं तयत्पवित्रं दशापवित्रप्रदेशः तेन दशापवित्र
हीत्वा अव्यावृत्तपवित्रं अव्याप्तं यत्पवित्रं दशापवित्रप्रदेशः तेन दशापवित्रे
ण गृह्य पात्रस्य बहिः पात्रं परिमृज्य एवं तयोर्निः सजोषाभ्यां त्वेत्यायतने सा
दयति पुरस्तात्प्रदुयामा यजु आगत्य ततउपरिष्टात्प्रयामा सन्ना सर्वत्र हणां
परिमार्जनं यथायोनि सादनं च। अयं वां मित्रावरुणा० श्रुत रहवा। इत्यनुद्रुत्य
पात्रमुपयच्छति। उपयाम० सि मित्रावरुणाभ्यां त्वा। तस्मिन्गृहीत्वा पात्रमपर्य
म्या। राया वयं ससवां सो मदेम हव्येन देवा यवसेन गावः तां धेनुं मित्रावरुणा
युवं नो विश्वाहा धत्तमनपस्फुरंती। इति तं श्रतेन पूर्वसंपादितेदोहेन पय
साश्रित्वा। एष ते योनिर्ऋतायुभ्यां त्वेति सादयति। अयं वेन श्चोदयत्पृश्निग
र्भा इ० भीरह ति। इत्यनुद्रुत्य शुक्रमुपयच्छति। उप० सि शंडाय त्वा इति गृहीत्वा

तिं हिरण्येन श्रीत्वा एषते योनिर्वीरतां पाहि इत्या यतने सादयति। तं प्रलथा पूर्व
था० सुवर्घर्मो इत्युनु दुत्समन्थिपात्रमुपयच्छति। उप० सिमकोयुखे नित स्मिन् ग
१२० त्कातिमनो नयेषु हवने श्रुतिगं विपः शच्याकगुधा द्रवंता आपः शर्मा भिस्तु विन
मणो अस्याश्रीणीतादिषु संगानकार्यः प्रमादाज्जातप्रायश्चित्तं तथोक्तं शास्त्रा
तरेनास्पृष्टा दकाः सोमेनेतराणि हवींषि रन्निति। दशापवित्रेण परिमज्य एष
ते योनिः प्रजाः पाहीत्यायतने सादयति यदेवा॰ व्येकादश॰ मजुषध्वं उपया॰ सी
ति अथर्वोपयामगृहीतोस्याग्रयणोसि स्वाग्रयणो॰ ही द्रियेण। इति गृह्णाति। पु
रस्तादुपयामेन यजुषाद्वाभ्यां धाराभ्यां गृह्णाति च आग्रयणस्याल्या सोमस्तेस्य

के देशमन्यस्मिन्पात्रे सोमंच्या द्वितीयां धारां करोति धारयोर्थ आग्रयणं गृहीत्वा हिमिति त्रि
हिंकरोति शनैस्त्रे ॥१२०॥

५र

घोच्चैरथसूक्तैः सोमः पवते सोमः पवते सोमः पवते इति त्रिराहृत्यैनेरग्न्यथोच्चैरथ
सूक्तैः अस्मैब्रह्मणे पवते स्मैक्षत्राय पवते स्मै सुन्वते यजमानाय पवत इष ऊर्जे
पवते अद्भ्य ओषधीभ्यः पवते वनस्पतिभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय
पवते ब्रह्मवर्चसाय पवते यजमानाय पवते मह्य ज्यैष्ठ्याय पवते। इति सोममभिम
मंत्र्य दशापवित्रेण संमृज्य स्पतेयो। नोर्विश्वेभ्यस्त्वा देवेभ्यः इत्यायतने साद
यति। अतऊर्ध्वमुपब्दिमता स्वरेण ग्रहणं। यानूर्ध्वां स्तानुपब्दिमत इति श्रु
तेः अतिग्राह्यान्गृह्णाति। अग्न आयूंषि पवस इति दुच्छुनां। इत्यनुद्रुत्याग्नेय
पात्रे उपया० स्यग्नये त्वा तेजस्वते। इति गृहीत्वा एष ते योनिरग्नये त्वा तेजस्व
त इत्यायतने सादयति। उत्तिष्ठन्नोजसा सह० चमूषु ता। इत्यैंद्रपात्रमुपयछ्

तिः। उपया॰ सीन्द्राय त्वौजस्वत इति गृहीत्वा निमृज्यैष ते योनिरिन्द्राय त्वौजस्वत इ
।।१२५ त्यायतने सादयति तरणिर्विश्वदर्शतो॰ रोचनं इत्यनुद्रुत्य सौर्य्यं। उप॰ सिसू
र्यो यत्वा भ्राजस्वत इति तस्मिन्गृहीत्वा निमृज्यैष ते योनिः सूर्याय त्वा भ्राजस्व
त इत्यायतने सादयति। मूर्धानं दिवो॰ न संत देवाः उपयामगृहीतोस्यग्नये त्वा वै
श्वानराय ध्रुवो॰ ताक्षित्तमः। इति स्थाल्या ध्रुवं पूर्णं गृहीत्वा एष ते योनिर
ग्नये त्वा वैश्वानराय॰। इत्यायुष्कामस्य हिरण्ये सादयति। ध्रुवं सादयित्वा रा
जानमृतिपावयति यावत्तत्प्रातःसवनाया प्त मन्यते विरमति धारा प्रपीड्य
पवित्रं निदधाति द्रोणकलशे चमसे णि वा मैत्रावरुण चमसीयाः सर्वां श्वे
क धनेक देशाश्चाधवनीयेवनीय आधवनीयस्यैकदेशा इति रः पवित्रपूतम ।।१२५

ल्यवनयति। अतऊर्ध्वं पूतभृतिस्तिरःपवित्रमवनीयते। पवमानग्रहान्गृह्णातिउ
पया० सिप्रजापतयेत्वेति द्रोणकलशमभिमृशेत्। उपया० सीन्द्रायत्वा। इत्या
धवनीयं। उप० सिविश्वेभ्यस्त्वा देवेभ्यः इति पूतभृतमभिमृशेत् निःसर्पतः स
मन्वारभेते ध्वर्युं प्रस्तोता प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गाता उद्गातारं ब्रह्मा
ब्राह्मणं यजमानो न्वारभेत इति अध्वर्युराहवनीये नुकरणं पाचतुर्गृहीत्वा
जुहोति। निःसर्प्य यस्ते द्रप्सः स्कंदति यस्ते अंशुर्ग्रावा० तं जुहोमि स्वाहा। इन्द्राय दं। या
द्रप्सो अंशुः पतितः ९० होमि स्वाहा। इन्द्राय द। यस्ते द्रप्सो मधुमां इन्द्रि० हो
मि स्वाहा। इन्द्राय दं। यस्ते द्रप्सः स्कंदयति स्ते अंशुः स्वः परश्चयो दिवः परः
अयं देवो बृहस्पतिः सं तं सिंचतु राधसे स्वाहा। बृहस्पतय इदं। पुनर्गृहीत्वा।

महान्‌ विहोता सत्स॰ नेनमः पृथिव्यैस्वाहा॥ वानस्पतयइदं वै भुधास स्तोतारं
॥१२८ चतुर्होदंच्वः अहा। बहिष्पवमानं सर्पंति। आस्तावदेशं गच्छंतीत्यर्थः अत्र ब्र
ह्म यजमानावपि सृप्तः गायत्रः पंचावसवो देवता। वक्रेण परिपरेण यथा
स्वस्तिवसून्‌ शायदा मं ग्रेगा अग्नएऽ(॰) यजमानं च इति सर्वं प्रव्यवायनान्वा
रब्धा एवगच्छंति अध्वर्युः पूर्वो बहि ... प्रमीब दिव धून्वेन्‌ सर्पति दक्षिणेनचा
त्वालं प्रेक्षमाणो बहिष्पवमानेन नुवर्ते तद्यथा वायुर्हिंकर्त्ता ग्निः प्रस्तोता
प्रजापतिः सा॰ तः प्राणमयिद धातु। बर्हिर्मुष्टिं प्रपद्य स्तोत्रमुपाकरोति अ
ग्निमे॰ । असन्स्यैसजेवासजेर्ज्य ... न्तध्वं अभिसर्पय यजमाने
तिइदं बर्हिर्दानमेव स्तोत्रोपाकरणं सर्वान्पवमानानेवमेवोपाकरोति उपावर्त्तध्व ॥१२८॥

भितित्री नपीत्यर्थः पवमानत्रयव्यतिरिक्ता नारणिस्तोत्राण्याज्यानि ताऽग्निष्टो
मादीनि च। नहिंष्यामितराणि स्तोत्राणि। र[illegible]पमानं बहिष्पवमानं आत्मणाः सम
भिसर्पंति हिंष्य च परिलाधंते यजमानः पंल्यस्ये हिंकुरुतस्य प्रस्तुहितस्येमे
वरुध्ये। भूर्भुवः सुवः चित्तिः स्रुक् चि० सामाधर्युः इति जपति। ब्रह्मा ब्रह्मन् स्तो
ष्यामीत्युच्यमाने। देव सवितरेतत्ते प्राहतत्प्रच सुव० स्तुतदेवस्य सवितुः
प्रसवे रश्मिरसि क्षयाय त्वा क्षयं जिन्व। ओं स्तुत। इति प्रसौति। सर्वे स्तोत्रा
णामेष कल्पः रश्मिरसि क्षयाय त्वा क्षयं जिन्वेति स्तोत्रे स्तोत्रे उत्तरमुत्तरं स्तो
मभागानां दधाति यजमानः श्येनोऽसि गायत्रछंदा अनु० संपारय। इति म
ध्यमायां स्तोत्रियायामनुगायत्र[illegible]णा दव्या [illegible]चारमेत। स्तुतस्य स्तुतमस्यूर्जंम

स्तु॰ स्तुतस्य स्तुतं गम्यादिंद्रियावंतो वनाभेदधुक्षी० सोमेस०क्रस०यत्तोब०त
॥१२८॥ यो रश्मीणां। इतिस्तोत्रे समाप्ते नुमंत्रयते। स्तुते बहिष्पवमाने ब्रह्म यजमा
नाय यथेतं प्रत्येत्य यथायतनमुपविशतः सवनीयस्युवपाहोमात् चतुर्थः पु
रोलः अध्वर्युः अग्नीदग्नीन्विहर बर्हिस्स्तृणाहि पुरोडाशाँ अलंकुरु प्र
ति प्रस्थातः पशुनेहि इतिस्तुते बहिष्पवमाने ॐ उत्तिष्ठन्सं प्रेष्यति हविर्धा
ने प्रविश्य विलो सन्लो अंतमः श० इते अक्षितं। इत्यैंद्रवायवादिदश ग्रहा
नुपतिष्ठते। पुनर्विलोलन इत्युक्तो सोमपात्राणि संमृशति रिक्तान्यपीति के
चित् आग्नीध्रीयाद् आग्नीध्रो अंगारानां हृत्य प्रत्यङ्मुखः वह्निरसि हव्यवाह
नो इति होत्रीये रौद्रेणानीकेन तत्सर्वत्र पुनरंगारानादायाग्नीध्रात् पूर्वमाहव ॥१२८॥

नाग्र्यं चाहृत्य दक्षिणेनाग्नीध्रं सदः प्रविश्य श्चात्रो सि प्रचेता रौद्रेणानीकेन्यो
नेर्दिमीत्रावरुणस्य यथेतं प्रत्येत्याग्नीध्रा नादाया दायोत्तरतः सदः प्रविश्य
ब्राह्मणाछंस्यादीश्चतुरो विहरति। तुथो सीति ब्राह्मणाछंसिनः उशिगसी
ति पोतुः अंधारिरसीति नेष्टुः अवस्युरसीत्यछावाकस्य प्रशास्तमार्गेण
शुंध्यूरसीति मार्जालीये अध्वर्युः कस्मिंश्चिच्चमसे द्रोणकलशात् परिप्लवया
चतुरो ज्वालानां गृहीत्वा प्रचरण्यां अपूर्वो ज्यास्य गृहीतं गृहीत्वा पुरस्तात्प्रत्य
ङ्मासीनः सोमनाहवनीयादीश्चतुरो व्याघारयति सम्राडसि कृशानूरौद्रेण।
हिंसीः इत्याहवनीयं व्याघार्य सम्राजे धिष्ण्या येद अन्यत्र विभूरसि द्विगुण
विशिष्टा धिष्ण्या देवताः विभूरसि प्रवाहणो रौ॰ हिंसीरित्याग्नीध्रीयं।

वन्हिरसि हव्यवाहनो रो० सीरिति होत्रीयं व्याघारये अथाज्येन अग्नीत्रो सि प्रचे
तारो० सीरिति प्रशास्त्रीयं तुथो सीति ब्राह्मणाच्छंसिनं। उशिगसीति पोत्री
॥१२८ यं अं घारिरसीति नेष्ट्रीयं। अवस्युरसी त्यच्छावाकीयं अथ सामन शुंध्यु
रसीति मार्जालीयं अथ वाग्नीध्रीयं धाराहवनीयां तं वा क्रमेण व्याघारयति तद्धि
ष्ण्यदेशात् किंचिदपसृत्य वषट्करोति अग्रेण होतारं पुरस्तात्प्रत्यङ् मा सी
नः अन्वक्षस्ता देव सोम० रव्य धं इत्येव वक्ष्य प्रति प्रस्थातृ पवित्र यस्य। मंद्राभि
भूतिः० वाग्देवी सोमस्य पिबत्विति वा भक्षयति। हिन्वेम इत्यादिना पूर्वोक्त
मार्गेण भक्षयति। संततमनुप्रष्टुसां बर्हिः स्तीर्णाग्नीध्रः कर्मणो वा० यज्ञस्य सं-
पुरोडाशानलंकरोति देवो वः सविता [illegible] सविता मध्वानक्तु ॥१२८

तित्रिः अतिप्रस्थाता पञ्चांशूनाप्याययित्वा तीर्थेन प्रपाद्योपाकरणदेशमानयति अध्व
र्युः यावांकेश्याम धुं॰ मिक्षतं उपयाम॰ स्युग्विभ्यां त्वा। परिप्लवया द्रोणकलशादुप
स्तीर्य पूतभृत उन्नीय द्रोणकलशादभिघारयति। दशापवित्रेण संमार्ज्य एष ते
योनिर्माध्वीभ्यां त्वेत्यायतने सादयति। सर्वग्रहाणामेष कल्पः तं सादयित्वा। दे
वस्य त्वा स॰ भ्यामाददे। इति त्रिवृतां रशनामादाय पूर्वां मग्नां ओमीयुरशनामु
त्क्षिप्य गृहीत्वा रशनया नाभिदघ्ने परिव्ययति यो। यूपाय परिवीयमाणायानु
ब्रूहीति संप्रेष्यति। परिवीरसि परि त्वा दे॰ र्म मनुष्याः इति परिव्ययति। अंतरि
क्षस्य त्वा सानाववगूहामीति स्वरुमवगूहति यूपमुत्सृज्य स्वे लोके ति द्विः बर्हिषी
आदाय [illegible] युपो देवानित्या घावपा

होमात निरूढवत मजोतेः परमं पशुं पशुपत इत्यादि प्रजापतत्योः इदिपं चहो
१२८ जुति अग्नेर्जनित्रमसीत्यादि वेदं निधाय सामिधेनीभ्य० संप्रेष्यति प्रया
जादिवपा होमान्तम विकारं अग्नये छागस्य वपायामेदसोनुब्रूहि आश्र
वयास्तु औपयरूपं च पशु प्रकृतिलेन संप्रेष्यति अग्नी षोमीय पक्षेतु अ
ग्नये छागस्य वपायामेदसः प्रेष्य जातवेदो वपया० तुरेगः स्वाहा यजमा०
अग्ने रूद्रदेव० येइंद्रियावी जमानमिति वा वरं च ददाति। अध्वर्युः संस्रावे
णाभिहृत्य सर्वेचात्वालेमार्जयंते हुतायां वपायां। प्रस्थास्यतो ग्रहावकोशेरूपस्त
प्य प्रसर्पति। अध्वर्युः प्रतिप्रस्थोता नेता ब्रह्मा यजमानश्चोपतिष्ठंते द्रोस
मुद्रो वितताव जू० नातिपंत्यन्यं इतिसदेव द्रोणकलशाधवनीयावुपति १२८

ष्टंते। ऌद्रधसी सततौ क्स्त॰ अनुहाय जोर्षे इति पूतभृतमुपतिष्ठंते। परिभूरग्निं
परिभूरिंद्रं परिभूर्विं॰ यतस्य तद्दसुन्मज्जे इति सकलं सवं सोममुपतिष्ठते। प्रा
णाय मे वर्चो दाव र्चसे पवस्वेत्युपांशुपात्रं। अपानाय मे व॰ स्वेत्यंतर्यामं। व्याना
य मे व॰ वर्चसे त्युपांशुसवनं ग्रावाणं। वाचे मे वर्चो॰ वस्वेत्यैंद्रवायवं। दक्षक्रतुभ्यां
मे वर्चोदा मे॰ वस्वेति मैत्रावरुणं। चक्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथामिति शुक्रामं
थिनौ। श्रोत्राय मे व॰ वस्वेत्याश्विनं। आत्मने मे व॰ वस्वेत्याग्रयणं। अंगेभ्यो
मे व॰ वस्वेत्युक्थ्यं। आयुषे मे वर्चो॰ स्वेति ध्रुवं। वीर्यो य मे वर्चो॰ स्व। अतिग्रा
ह्यान्स्त्रिरावं सा प्रत्येकं। विष्णोर्जठरमसि वर्चो॰ वस्वेति द्रोणकलशं। इंद्रस्य
जठरमसि वर्चो॰ वस्वेत्याधवनीयं। विश्वेषां देवानां जठरमसि वर्चो॰ वस्वे

तिपूतभृतं। वर्चोदामेवर्चसेपवस्वेतिसर्वत्रानुषजति। कौशिकोनामकस्मैला
कायत्वायं ० श्रीयतस्यत इदमुन्मृजे। इत्यविशेषेण सर्वराजानं। स्फ्यः स्वस्ति ॥१२६
र्विघनः स्वस्तिः प० शुर्नः स्वस्तिः इतिप्रत्येकं स्वस्त्यनैः स्फ्यविघनपशुपरभू
नुपतिष्ठंते। यज्ञियायत्त कृतस्यते मास्मिन्यज्ञे उपहृयध्वं। इति सर्वाणि स्फ्या
दीनि संस्रोपतिष्ठते। उपमाद्यावापृथिवी ह्वयेतां। द्यावापृथिव्यौ। उपास्तावो
ह्वयतां। इतियत्रबहिष्पवमानेनस्तुवंते तदेशः। उपकलशो ह्वयतां। द्रोण
कलशः। उपसोमो ह्वयतां। इति सर्वं सोमं। उपाग्निर्ह्वयतां। इत्यग्निं। उपदे
वाह्वयंतां। इ[illegible]व अहदेवताः। उपय

ज्ञो ह्वयतां। इतियज्ञसादनानिहविराज्यानि। उपमाहोत्रा उपहवे ह्वयतां। इ ॥१२६

तिहोत्रकानुपतिष्ठते।नमाग्नयेमखघ्नेमखस्यमायशोयोत्। इत्याहवनीयं।नमो
रुद्रायमखघ्नेनमस्कृत्यामापाहि। इत्याग्नीध्रीयमुपस्थायापउपस्पृश्य।न
मइंद्रायमखघ्नइंद्रियंमेवीर्यंमानिर्वधीः। इति होत्रीयं।नमोयमायमखघ्नेमखस्य
मायशोयोत्। इतिमार्जालीयं। दृष्टेस्थः शिथिरेसमीचीमांहसस्पात। इत्यधि
षवणफलके।सूर्येमादेवोदिव्यादंहसस्पातु।सूर्ये।वायुरंतरिक्षात्पातु।
इतिवायुं।अग्निःपृथिव्याःपातु।अग्निं।यमःपितृभ्यःपातु।यमं।सरस्व
तीमनुष्येभ्यःपातु।सरस्वती।देवीद्वारोमामासंताप्तं। इति सदोद्वारे।नमः
सदसे। इतिसदः नमः सदसस्पतये। इतिसदस्यंब्रह्माणंवा।नमःसखीनां
पुरोगाणांचक्षुषे। इत्यृत्विजः।नमोदिवे। इतिदिवं।नमःपृथिव्यै। इतिपृथि

वीमुपतिष्ठंते। अध्वर्युः पूर्वेण द्वारेण सदः प्रविश्याप उपस्पृश्य। अहे दैधिष
व्याद्त० त्पाकतरः। यत्रानिषसृप्य भवतिततः स्वासनात्तृणं लोष्ठंवा निरस्य
॥१२७॥ उन्निवत उदुद्धतश्च० वी अद्याहूः। इत्युपविशतिप्राङ्मुखः। ततोब्रह्मयजमा
नौ पूर्वोद्द्वारेण सदः प्रविश्याग्रेण प्रशास्त्रीयं धिष्ण्यं परीत्य दक्षिणेन धिष्ण्यं
उपविशतः। अहे दै० उन्निव० एवं दक्षिणेनौदुंबरीं सदस्यः एवं सदः प्रसृप्य
उपवेशनानंतरं प्राचीनावीती आयंत पितरः पितमा० यूयं भूयास्त। इतिद
क्षिणार्धस्थान्पितॄनुपतिष्ठंते। यज्ञोपवीत्यपउपस्पृशंते। ततः पशुतंत्रं
प्रपद्यते शमितः प [illegible] रिभ
नो० भृगूणामंगिरसां० द्यौ देवस्थेति मंत्राः श्रप्यमाणः सर्वाणि सवनानि

परिशेरतेतृतीयसवनेवा श्रप्यते। ब्रह्मयजमानावुपनिष्क्रम्यापरेणोत्तर
वेदिमतिक्रम्य दक्षिणत उपविशतः। प्रतिप्रस्थाताहृतान्पुरोडाशधानादी
न्ध्वर्युरासादयतिप्रियेण नाम्ना० आसीदंत्विति। ततस्तूष्णीं दक्षिणस्यां
श्रोण्यांवर्हिष्व्यूह्यसादयति। ततस्तूष्णीमेवोत्करेवाजिनमासादयतिम
जमा० यस्त आत्मन्नासाद्यमानामामिक्षां। योनः कनीयइह० अपतामिंद्रो
हरिवान्भुवनान्नुदतामं०यधानाअभिमृशति। योनः कनीय० अपतामिंद्रः
पूषण्वान्भुवनान्नुदताम०य। इतिकरंभं। यजुोसीतिपरिवापं। योनः कनी
य० अपतामिंद्रो भुवनान्नुदतामिहं०य। इतिपुरोडाशं। इयमिंद्रियममृतंवी
र्यमनेनयंद्रायप० तयादेवा अ०नेयमामिक्षामयिश्रयता। इत्यामिक्षां। यस्त

श्रीः

थिवीमसरस्त्... स्रं० न्मेहं द्रंवाजिनं मांधिनोतु। इतिवाजिनं। अयंयज्ञ० पंचहोत्रा च
।।१२८ आसंनानिहविःष्यभिमृशति। ततोध्वर्युर्जुह्वेमंतोरुपस्तीर्य। मामेमोषु संवि
जिध्वं मावोहिंसिषं मावस्तेजो पक्रमीत्। भरतमुद्धरतेमनुषिंचता वदाना
निवः प्रत्यवदास्यामि नमो वो अस्तु मा मा हिंसिष्ट। धाना अभिमंत्र्य हिरव
दाय परिवापकरंभपुरोडाशामिक्षा तान्मा मेधेति प्रत्येकमभिमृश्य हिर्द्वि
रवद्यति। यदवदानानि वो वद्य० नतद्भआप्यायतां पुनः धानाः प्रत्यभिघार्य। पूर्व
वदितरानभिघार्य सर्वेभ्य उत्तरार्धेभ्य उपभृति स्विष्टकृते सकृत्सकृदवद्यति।
सकृज्जुहांद्विरवभत्यभिघार्य। प्रातः प्रातः सावस्येंद्राय पुरोडाशानामनुब्रू
हि। इतिसंप्रेष्यति। अत्याक्रम्याश्राव्य प्रत्याश्राव्य प्रातः प्रातः सावस्येंद्राय ।।१२८

पुरोडाशा आस्यता अध्ये तिसंप्रेष्य ति। वषट्कृते जुहोति। यजमानः इंद्रो यदं।
इंद्रस्याहं देवयज्ययेंद्रियाव्यन्नादः। इंद्रियाव्यन्नादो न्नाद इंद्रियाव्यंन्नाद इंद्रि
यावी भूयासं। प्राणैः सायुज्यं गमेयं। अंमभृतं तजह्वां पर्येस्याग्नयेनुब्रूहि आ
श्राव्य प्रत्याश्राव्याग्नये प्रेष्येति वषट्कृते जुहोति। अग्नयइदं। अग्ने रहं० यायु
ष्मान्यज्ञेन प्रतिष्ठां० अग्निर्मा दुरिष्टात्० अध्वर्युः वैश्वानरे इत्युदकं निनीय
परिवापं विरुज्यान्यान्य विरुज्य प्राशित्रमवद्यति नेडावमेद्यति। ब्रह्मा मित्र
स्य त्वा० प्रेक्षे। आज्यादीनि सर्वाणि हवींष्याघ्राय गोसारके स्थापयित्वा आज्य
लिप्तापाणी प्रक्षाल्य सौमिकं कर्म कृतिपद्यते ब्रह्मा यजमानो यथेतं प्रत्य
त्यसदः प्रविश्योपविशतः अध्वर्युप्रतिप्रस्थातारौ हिदवत्स्यैः नचरतः

उपयामगृहीतोसि वायवइंद्रवायुभ्यां त्वा। इति प्रतिप्रस्थातादित्यपात्रेऐंद्र
॥१२८ वायवस्यैकदेशं गृह्णाति। उपयामगृहीतोसि वाक्षसदसि वाक्पा०ध्य
क्षाभ्यां गृह्णामि इति तत्रैव द्वितीयं द्रोणकलशाद्गृह्णाति। अध्वर्यु रैंद्रवा
यवमादत्ते द्रोणकलशात्परिप्लवया राजानं परिगृह्योभौ हविर्धानादुप
निष्क्रम्य अध्वर्युः अध्वरोय त्वा यमस्तु देवा ओ० घृतवद्देवसोमस्वाहा इ
त्या घारयति। परिप्लवया सोमपीथो शुकृतो भवति। ओषधीभ्यः पशवे
जनाय विश्वस्मै भूताय दे। सोमाय दर्माति भाष्यकारः अपरेणाग्निं दक्षि
णतोध्वर्युरुत्तरुतः प्रतिप्रस्थाता चतिष्ठतः अध्वर्युः वायवइंद्रवायुभ्या
मनुब्रूहि आश्रावयास्तु श्रौषट् वायवइंद्रवायुभ्यां प्रेष्येति। यजमानो हूय ॥१२८

मानेंद्रवायवे भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहि। इत्यादित्यमुपतिष्ठते। उभौ वषट्कृते जुहुतः पुनर्वषट्कृते जुहुतः वायव इंद्रवा युभ्यामिदं। अध्वर्यो पात्रे प्रतिप्रस्थाता संपातमवनी अध्वर्युः प्रतिप्रस्थातुः पात्रे एकदेशं य
संपातस्यावनयति। अध्वर्युः सदो गछति। प्रतिप्रस्थाता हविर्धानं प्रविश्य
देवेभ्यस्त्वेत्यादित्यस्थाल्यां संपातमवनयति। विष्णुरुरुक्रमैष ते सोमस्तं
रक्षस्व तं ते दुश्चक्षा मावख्यत् इत्यादित्यपात्रेणादित्यस्थालीमपिदधाति।
अध्वर्युः मधिवसुः पुरोवसुर्वाक्पावाचं मे पाहीति सोत्र भक्षं प्रयछति। ते
नैव होता प्रतिगृह्णाति। परिप्लवाशेषं भक्षायाध्वर्यु रेकत्र पात्रे स्थापयति
अथ मैत्रावरुण ग्रहेण प्रचरतः। प्रतिप्रस्थातादित्यपात्रे। उपयामगृही

तोस्यन्त सदसि चक्षु० गच्छामि। इति मैत्रावरुणग्रहादेशौ के देंगच्छातिनद्रो
॥१२० णकलशात्। अध्वर्युर्मैत्रावरुणमादत्ते उभौ हविर्धानान्निष्क्रम्यापरेणाग्निं दक्षि
णतो ध्वर्युरुत्तरतः प्रतिप्रस्थाता च तिष्ठतः अध्वर्युः मित्रावरुणाभ्यामनुब्रू
हीति संप्रेष्य आश्रावयास्तु श्रौषट् मित्रावरुणाभ्यां प्रेष्य। उभौ वषट्कृते स
कृज्जुहुतः मित्रावरुणाभ्यामिदं यजमान० धूरसि श्रेष्ठो रश्मीनाम प्राण० पा
हि। प्रतिप्रस्थाता ध्वर्योः पात्रे संपातमवनयति। अध्वर्युस्तस्यैकदेशं प्रतिप्र
स्थातुः पात्रे वनीय सदो गच्छति। प्रतिप्रस्थाता हविर्धाने प्रविश्य विश्वेदेवेभ्यस्त्वे
त्यादित्यस्थाल्यां संपातमवनीय विछुवरु कर्मान्तितेन पात्रेणादित्यस्थाली
मपिदधाति। अध्वर्युः मयि वसु द्वि दउ सु श्वक्षुष्या श्चक्षुर्मे पाहीति होत्रे ॥१२०

भक्षंप्रयच्छतितेनैवहोताप्रतिगृह्णाति ततआश्विनेनप्रचरतः। प्रतिप्रस्थाता।
उपयामगृहीतोसिश्रुतसदसिश्रोत्रपा०भ्यांगृह्णामि। आश्विनेकदेशंस्वस्य
पात्रेगृह्णाति। नद्रोणकलशात्। उभौनिष्क्रम्यपूर्ववदपरेणाग्निंतिष्ठतः। अध्व
र्युः अश्विभ्यामनुब्रूहि आश्रावयास्तुश्रौषट् अश्विभ्यांप्रेष्यउभौसकृद्व
षट्कृतेजुहुतः। अश्विभ्यामिदं। प्रतिप्रस्थाताध्वर्युपात्रेसंपातमवनयति। अध्व
र्युः प्रतिप्रस्थातृपात्रएकदेशमवनीयसदःप्रविशति। प्रतिप्रस्थाताहविर्धा
नेप्रविश्यविश्वेभ्यस्त्वादेवेभ्यइतिस्थाल्यांसंपातमवनीयपिस्रुवुरुक्मेति
तेनपात्रेणस्थालीमपिदधाति। अध्वर्युःसयविवसुःसंयद्वसुःश्रोत्रपाःश्रो
त्रंमेपाहीतिहोत्रेभक्षंप्रयच्छतितेनैवहोताप्रतिगृह्णाति। अथयदिउच्छेषोन

॥१२१ ष्यतितार्हियदिसोम उपदस्येद्दितिविधानेनोत्पत्तिःकार्या। अध्वर्युः आधवनी
येपूतभृत्स्ववनीयश्च आधवनीये दशाभिर्मेष्ट्वा न्युब्जति अपीद्य पवित्रं निद
धाति। तास्त्रीन्ब्रह्मोद्गाता यजमानः सदस्यश्चेमध्यसंःकारिणःमैत्रावरु
णो ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाक आग्नीध्रश्च होत्रका उभयेचमसिनो
भवंतिसर्वेषां प्रतिपुरुषं चमसाध्वर्यवः। अध्वर्युः। उन्नीयमानेभ्योनुब्रू
हि होतुश्चमसमनून्नय ध्वमुभयतः शुक्रान्कुरुध्वमच्छावाकस्यचमसा
ध्वर्यो मात्वमुन्नेष्ठाः प्रतिप्रस्थातः प्रोक्षिताप्रोक्षितांश्छकलान्कल्पयोन्ने
तः सोमं प्रभावयेति संप्रेष्यति। स्वरएव होतृचमसमुख्यान्दशचमसानु
न्नयंत्यन्यानच्छावाकचमसान्परिप्लवयोन्नेता द्रोणकलशामुपस्तीर्य ॥१२१

पूतभृत उन्नीय द्रोणकलशादभिघारयति। सर्वेचमन्थिनामयंकल्पः प्राकृस्थि
तेष्वेवोन्नीयमानमुक्तं। तस्मिन्परिश्रिते। देवस्यत्वासं० भ्यामाददे। इत्यध्वर्युः
शुक्रग्रहमादत्ते तेनैव मंथिनं प्रतिप्रस्थाता। तूष्णीं चमसांश्चमसाध्वर्यव आद
दते। तूष्णीं संस्कृताभिरद्भिः प्रोक्षिताभ्यांशकलाभ्यांशुक्रामंथिनौ अध्वर्युप्रति
प्रस्थातारौ अपिधत्तः अपनुत्तः शंडः सहपाप्मना [illegible]
[illegible] अपनुत्तो मर्कः सहपाप्मनेति अप्रोक्षिताभ्यां शकलाभ्यामुधस्तात्यां
सूनपध्वंसयतः ताभ्यामेव शकलाभ्यामुपयच्छतः। अध्वर्युः स्तुतोसिज
नधादेवास्त्वा शुक्रपाः प्रणयंत्विति शुक्रंहरति। प्रतिप्रस्थाता। स्तुतोसिज
नधादेवास्त्वा मंथिपाः प्रणयंत्विति मंथिनंहरति। उर्वंतरिक्षमन्विहीतिग

घ्नतः अनप्रथ्यं चमसाध्वर्यवः प्राञ्चोनुपूर्वं तिष्ठंति। तान्दक्षिणेनाध्वर्युर्हरति
१२८ उत्तरेण प्रतिप्रस्थाता सर्वे निष्क्रामंति। अग्रेण हविर्धाने अरत्निपात्रेवा उभौ
न आयुः संधत्तं तं मे जिन्वतं प्रा॰ तं॰ मपा॰ तंव्या॰ तंच॰ तं॰ श्रो॰ तं॰ मन॰ तं॰ वा॰ तां॰
त्मितिसंधत्तः अध्वर्युर्दक्षिणेन गच्छत्युत्तरेण प्रतिप्रस्थाता। अपरेणच
मसाध्वर्यवस्तिष्ठंति उभौ अनाधृष्टा सीत्यंगुष्ठाभ्यामुत्तरवेदिं विलिख्य तौ वि
परिक्रामतः अध्वर्युः सुवीराः प्रजाः प्र॰ हि शुक्रः शुक्रशोचिषा। इति दक्षिणे
न हरति। प्रतिप्रस्थाता। सुप्रजाः प्रजाः प्र॰ रीहि मंथी मंथिशोचिषेति उत्त
रेण हरति। यजमानः सोऽ[illegible]

[illegible] वीतौ इत्यनुमन्त्रयते।
उभौ अग्रेणाहवनीयमभितो यूपं पुरस्तात्संचावव तिष्ठते पश्चात्प्रांचंश्च

मसाध्वर्यवः अध्वर्यु संजग्मानौ दिव आपृथिव्याः शुक्रः शुक्रशो।चिषेति प्रतिप्र
स्थाता संजग्मानौ दिव आपृथिव्यामंथीमंथिशो।चिषेति उभौ अरत्नी पात्रे वा
संधत्तः उभौ आयुस्थ आयुर्मे धत्तमायुर्यज्ञाय धत्तम। ०प्रा० च०श्रो० तो० पुत्र
जामयि चैयपुजमाने च।इत्युभौ ग्रहावभिमंत्रयते।अध्वर्यु शुक्रस्या।धिष्णा
नमसि शुक्रे बाते सांभिध्यस्व स्वाहा।प्रतिप्रस्थाता।मंथिनो।धिष्णानम।सि
मंथिन्नेषा तेस मित्तया सभिध्यस्व स्वाहा।उभौ स्वप्रो।क्षितौ शकलो अभ्या
धत्तः शुक्रामंथिभ्यामिदं।निरस्तः शंडः सहमाप्मना।निरस्तो मर्कः सह
पाप्मना इत्यप्रोक्षितौ शकलौ बहिर्वेदि निरस्यतोपउपस्पृश्या अध्वर्युरा
श्राव्य प्रत्याश्राव्य आत आतः सोमस्य शुक्र शुक्र तो मंथिन तोम धुश्चुत इ

द्रम्य सोमान्त्रस्थितान्प्रेष्य। मध्यतःकारिणां चमसाध्वर्यवो वषट्कृता... नुवषट्कृ
१२२ तानुजुहुत होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा। शुक्रस्या स्युन्नीयोपा
वतेध्वमिति संप्रेष्यति। आच्छिन्नस्यते रयिपृषते सुवीर्यस्य द्रोणस्य जोवयं।
शुक्रं हूयमानमन्वारभते। वषट्कृते सर्वे युगपज्जुह्वति। स प्रथमः संकृति
र्विश्व० इंद्राय सुतमा जुहोमि स्वाहेत्यध्वर्युः प्रतिप्रस्थाता। स प्रथमः सं० स्मै
मित्राय सुतमा जुहोमि स्वाहेति। इंद्रायेदं मित्रायेदं। प्रतिप्रस्थाता उत्तरतः पु
रस्ताद्बर्हिः परिध्यंतर्वेदि आहवनीयादंगारं निरूह्य तस्मिन्। एष ते रुद्र भा
गो यन्निरयाचथास्तं जुषस्व विदे० णारं स्वस्तिरं स्वाहा। इत्येतं मंथिनः सं
स्रावं सर्वहुतं जुहोति। रुद्राय वास्तुपतय इदं। मध्यतःकारिणां चमसाध्व ।।१२२

र्यध्वर्युः। प्रतिप्र० स प्रथमः सं० तस्मै मित्राय सुतमा जुहोमि स्वाहेति जुहोति।

यैवानुवषट्कृते जुहोति। अग्नये स्विष्टकृत इदं। अध्वर्युः प्रेतु होतुश्चमसः प्रब्रह्म
णः प्रोद्गातुः प्रयजमानस्य प्रसदस्यस्येति संप्रेष्यति। अध्वर्युप्रतिप्रस्थातारो
यथेतं प्रेत्य अध्वर्युः सूदव शुक्रपात्रमायतने सादयति प्रतिप्रस्थाता। असु
दमेव मंथिपात्रमायतने सादयति। मध्यतःकारिणां चमसान्सदो हरति। हो
त्रकाणां चमसाध्वर्यवः हविर्धानं प्रविश्य शुक्रोद्द्रोणकलशस्थः सोमस्तस्यो
पस्तरणोन्नयनाभिघारणानि स्वस्वचमसे कुर्वंति। एवं स्वस्वचमसमुन्नीया
हवनीयमुपावर्त्तते। अध्वर्युः तैः प्रचरति। मैत्रावरुणचमसमादायाश्राव्य
प्रत्याश्राव्य प्रशास्तर्यज इति संप्रेष्यति। वषट्कृतानुवषट्कृतयोः हुत्वान्त
मसाध्वर्यवे [illegible] मैत्रावरुणाय। मद। अग्नये स्विष्टकृत इदं। चमसा

ध्वर्युः सदो भक्षं हरति । चनमा गणयो य: ... सदः प्रविष्टस्तेनैतेनतस्मै चम
।।१२४ समाहरति । तनैव प्रत्स्य प्रत्याहरति अध्वर्युरेवमुत्तरैः प्रचरति आश्राव्य
प्रत्याश्राव्य ब्रह्मन्यजेति ब्राह्मणाछंसिनं प्रेष्यति । इन्द्रायेदं अग्नये स्विष्टकृ
त इदं तं तं चमसमादाय आश्राव्य प्रत्याश्राव्य पोतर्यजेति पोतारं संप्रेष्य
ति । मरुद्भ्य इदं । अग्नये स्विष्टकृत इदं । आश्रा० अस्तु० नेष्टर्यजेति नेष्टा
रं सं प्रेष्यति । त्वष्ट्र इदं । अग्नये स्विष्टकृत इदं । आश्रा० अस्तु० अग्नीद्यजे
त्याग्नीध्रं सं प्रेष्यति । अग्नय इदं । अग्नये स्विष्टकृत इदं । तस्य चमसमादा
य सदो गच्छति सहोतुरध्याऽग्नीदित्याचष्टे होत्रा पूर्वपृष्ट श्चदिदमे ... वो
त्तर । स भद्रमकर्यो नः सोमं पाययिष्यतीति होताप्रत्याह अध्वर्युः न च ।।१२४

क्षसंस्त्वा देव सोम सुचक्षा अवख्येषं। इत्यवेक्ष्य। मंद्राभिभूतिः केतुर्यज्ञानां वाग्‌
जुषाणा सोमस्य तृप्यतु इति प्रतिप्रस्थाता। स्रुच उपहूय व्याघारं
भक्षयति। हिन्व मे गात्रा हरिवो गणान्मे मा वि तीतृषः इत्याघ्राणमभिमन्त्र्य पात्रे प्रक्षाल्य निधाप
यति। वाग्देवी सोमस्य पिबत्विति वा भक्षमंत्रः सर्वत्र। अथाध्वर्युर्द्विदेवत्यान्भक्षयति।
होता प्रथमो भक्षयति। ततोध्वर्युस्ततः प्रतिप्रस्थाता द्विरैन्द्रवायवं भक्षयति।
क्रमेण द्विर्वषट्कारकरणाद्विः संप्रदानात्तत्र ग्रहसंपातावनयनात् भक्षं भ
क्षमंत्रमावृत्य भक्षणं सकृत्सकृदितरौ मैत्रावरुणाश्विनौ होता प्रथममैन्द्र
वायवं भक्षयित्वानुसृजन्नेवाध्वर्यवे ददाति। अध्वर्युः भक्षेहि मा विश दीर्घा
युत्वाय शं॰ सा प्रियो मे हृदोसि इति भक्षमतीक्षते। अश्विनोस्त्वा बाहुभ्या

ऽस्मध्या सं। इति प्रतिगृह्य। नचक्षसं त्वादे० अवख्येषं। इत्यवेक्ष्य। होतरुपह्वयस्व।
॥१२८ प्रतिप्रस्थातरुपह्वयस्व। मंद्राभिभूतिः केतुर्य० तुमंद्रास्व० त्वेहि विश्वं च० या
युपेवर्चसे। वसुमद्गणस्य सो० विदैः प्रातः० तो भक्षयामीति प्राणेषूपनिग्रा
ह्य वाग्देवी सोमस्य पिबत्विति वा भक्षयति। अनुत्सृजनेव प्रतिप्रस्थात्रे प्रय
च्छति। हिन्व मे गात्रा हरि० मिमतिगाः। इत्यात्मानं प्रत्यभिमृशति। प्रतिप्रस्था
ता भक्षेहीत्यादिना भक्षं प्रतीक्ष्य अश्विनो रिति प्रतिगृह्य नचक्षसं त्वेत्यवेक्ष्य
मंद्राभिभूतिरित्यनुद्रुत्य वसुमद्गणस्येति वाग्देवी सोमस्य पिबत्विति वा प्राणे
षूपनिग्राह्य भक्षयति हिन्व म इत्यात्मानं प्रत्यभिमृशति होतृचमसे किं
चिदवनीयानुत्सृजं तदेवमेव भक्षयति होतृचमसे सर्वशेषमानीय पात्र ॥१२८

मुत्सृजंति। एवं मैत्रावरुणस्य भक्षयंति सकृदेव होता प्रथमो भक्षयति अध्वर्यवे
प्रयच्छति अध्वर्युः भक्षेहीत्यादिना प्रतीक्ष्याश्विनोरिति प्रतिगृह्य चक्षुः संवे
त्सवेक्ष्य मंद्राभिभूतिरित्यनुद्रुत्य चक्षुषो रूप निग्राह्य होतरुपह्वयस्वेत्यादि व
सुमद्गणस्येति वाग्देवीति वा भक्षयति हिन्व मइत्याभिमृशेति भक्षयित्वानु स्पृज
न्नयूच्छति प्रतिप्रस्थातापि भक्षेहीत्यादि हिन्व मइत्या साभिमृश्य नांतं करो
ति। होतृचमसे सकृदेवनीयपात्रमुत्सृजति। एवमेवाश्विनं दक्षिणे कर्णे उ
पनिगृह्य सर्वतः प्रदक्षिणमात्मानं परिहृत्य वामे कर्णे उपनिगृह्य यथेतं
पुनः परिगृह्य भक्षयंति सकृत्स्पातं होतृचमसे वनयति। पुरोडाशशाक
लमैंद्रवायवस्य पात्रेवदधाति। पयस्यां मैत्रावरुणस्य पात्रे धाना आश्वि

नस्यपात्रे। तानि पात्राणि हविर्धानस्यापरस्या द्वाराग्रप्राद्योत्तरस्यां वर्त्तन्यां सा
॥१२६ दयति। आनतीय सवनीयार्थ रस्ते। उत्तरेण हविर्धानं गत्वेडापात्रमुपस्ती
र्येत्यादिकरोति यजमानभागमवदाय पृथगौपधमामिक्षां हांच निदधा
ति। लाजानां चतुर्धाकरणं। इडामवदायांगुलिपर्वणी अनक्ति होत्र इडामा
दधात्युपोपहूतं चमसांश्चमसाध्वर्यवः उपहूयमानां होतृचमसमास्थ
र्थं धारयति उपहूतायां ततः प्राशित्र भक्षणानंतरं इडा शकलमध्वाकाऽ
यनि दधाति। पूर्ववदिडां भक्षयंति। ये प्रकृतावितिवचनात्प्रकृते सवनी
यपुरोडाशकर्मणि समवेता स्तस्तस्यर्थः ततो मैत्रावरुणः प्रतिप्रस्थाता

च भक्षयित्वामार्जयतस्वभागः सह यजमानसत्त माः ततो हविः शेष ॥१२६

भक्षयंति। होत्रका अग्ने भक्षयिष्यंति। तूष्णीं शाखां प्रहरति अथवा जिनेन प्रच
रंति व्याख्यातं पंचहोतरि वाजिनपात्रं उपस्तीर्य भामेरित्यभिमृश्य बर्हिषि वि
षिंचन् वाजिनं सर्वं गृह्णाति। पूरयित्वा नाभिघारयति वाजिभ्योनुब्रूहि आश्रा·
अस्तु· वाजिनो यज उर्ध्वे जुरासीनो होता वषट्कूरोति वषट्कृते विच्छिन्नच्यमान
या जुहोति। यजमा· वाजिभ्य इदं वाजिना न मम इदं· यं द्वियावीजं मानमितिबा।
अध्वर्युरनुवषट्कृते जुहोति। यज· अग्नये स्विष्टकृत इदं। अग्नेः स्विष्टक
तोऽहं दे· मायुष्मा· अग्निर्मा दु· अध्वर्युः वाजिनोद्रेकेण दिशः प्रतियजति
दिशः स्वाहेति पुरस्तात् प्रदिशः स्वाहेति दक्षिणतः आदिशः स्वाहेति प
श्चात् विदिशः स्वाहेत्युत्तरतः उद्दिशः स्वाहेति मध्ये· स्वाहा दिग्भ्य इति

॥१७९ प्रदक्षिणमनुषिंचन्जुहोति। नमो दिग्भ्य इत्युपतिष्ठते। यजमा॰ दिग्भ्य इद॰
प्रदिग्भ्यं आदिग्भ्यं विदिग्भ्य उद्दिग्भ्यं दिग्भ्य समुपहूय वाजिनं भ
क्षयंति। यजमानः प्रथम उत्तमो वा भक्षयति। वाजिनो भक्षो भवतु वाजो
